Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. १३९३ - घ

Title अपेक्षाबुद्धि द्वित्वयो

Author ....

Extent ६ .... Age ....

Subject धर्मशास्त्रम्.

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० १३१३-घ

अपेक्षाबुद्धिद्वित्वयो र्नाश्य नाशकभावः

नं० १३१३-घ
पत्राणि ७ (सप्त)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशाय नमः । श्रीमद्दक्षिणकेदारस्वलेशपदांबुजं · भगवत्यादिशक्त्याद्यं सूर्यादि समुपास्महे

श्रीग

१५०

दस

श्री

श्री

श्रीग

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वादार्थ

वे।

श्रीसरस्वत्यै नमः। ननु किं ताव[stain]दाश्रयनाशानाश्यवेगस्य नाशकमिति चेदत्र गौ[illegible]क।
स्वाश्रयोऽपसंयोग एव तादृशवेगस्य नाशकः। स्वपदं नाश्यत्वेनाभिमतवेगपरं। उत्तर
संयोगमात्रस्य नाशकत्वे स्वजनककर्माधीनोत्तरसंयोगेनैव कर्मनाशसमकालं
वेगस्यापि नाशा वेगस्य कर्मजनकत्वेनैव न संभवति। कर्मवति कर्मान्तरानुत्पत्तेः। अतः
स्वाश्रयोऽपसंयोगविशे[stain]षणं। वेगजनककर्माधीनोत्तरसंयोगेन वेगाश्रयोऽपष्ट। न चैवं
स्तत्वस्यतन्त्वघटे किं विभागात् त्वात् तत्तद्धान्ते विभागतो नाश्यनाशकभावः। न च सामान्य
तो वेगनाशत्वेन संयोगत्वेन कार्यकारणभावः। यत्र गतियोगितासंबंधेन वेगनाशक
त्रफलोपधानात्मकवेगनिष्ठस्वाश्रयोऽकत्वसंबंधेन संयोग इति सामानाधिकरण्य
वप्रत्यासत्तिः। तेन न यत्किंचित्संयोगात् वेगनाश इति वाच्यं। आश्रयनाशजन्यवेगना
शे व्यभिचारात्। न च विशेषणतां प्रति[stain]वेगनाशत्वेन संयोगत्वेन कार्यकारण

विशेषेण।

श्री।४५ ।।१।।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भावः यत्र प्रतियोगितासंबंधेन नाश्यवेगनाशस्तत्र फलोपधानात्मकवेगनिष्ठस्वप्रयोजकत्व
तासंबंधेन स्वसंबंध इति सामानाधिकरण्यं प्रत्यासत्तिः। आश्रयनाशजवेगनाशेऽभिचारव
रणाय विशेषणताविशेषेण वृत्तिमत्त्वं नाशविशेषणं। आश्रयनाशजन्यवेगनाशस्तु न वि
शेषणताविशेषेण वृत्तिमान् प्रतियोगिसमवायिनि स्वयाविशेषणतया नाशो वर्तते गाह्य
विशेषणतायाएव विशेषणताविशेषत्वादिति वाच्यं। विशेषणताविशेषेण वृत्तिमत्त्वस्या
ननुगतत्वात्। यत्र घटनाशकसामग्रीसमवधानकाले घटस्य वेगोत्पत्तियोग्योन्तरसंयोगोत्
न्नस्तत्र घटनाशानन्तरक्षणे घटवृत्तिवेगनाशासंभवात् तस्य विशेषणताविशेषेण वर्तमान
तया संयोगस्य तत्र हेतुत्वासंभवात् तत्राश्रयनाशस्यैव हेतुत्वं वृत्तित्वाभावात्. न च तत्र वेतोप्य
त्पाण एव आश्रयनाशात् वेगनाश इति वाच्यं। तथापि तत्र घटनाशानन्तरक्षणे न वृत्तिवेगे तादृशसंबंधे
न वृत्तिमतो वेगनाशस्य प्रतियोगितासंबंधेनोत्पन्नस्य पले दुर्वारत्वात्। अथ संयोगनाशप्रति
बन्धकं वेगनिष्ठं वैजात्यं। तच्चाश्रयनाशनाश्यवेगमात्रवृत्ति। न च केवलवेगजन्यतावच्छेदकं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२ वेगनिष्ठवेजात्यमादायसांकर्यं विनिगमकाभावेन कर्मादिजन्यतावच्छेदकजातेर्नानात्वस्य दुर्व
चत्वादिति वाच्यं। कर्मजन्यतावच्छेदिकायाः जातिद्वयी। एका संयोगनाश्यतावच्छेदकवेजात्यात्मि
का। अपरा च तद्भिन्ना। एवं वेगजन्यतावच्छेदिकापि जातिद्वयी। एका संयोगनाश्यतावच्छेदक
वेजात्यात्मिका। अपरा च तद्भिन्ना। तथैवं जातिद्वयस्य नाश्यतावच्छेदकतया नाश्यनाशक
भावद्वयापत्तिरिति वाच्यं। नाश्यनाशयोर्वेगं प्रति कर्मवेगयोः कार्यकारणभावकल्पनस्य संयो
गवेगयोर्नाश्यनाशकभावस्य वाभ्युपगमादिति चेन्न। संयोगनाश्यतावच्छेदकवेजात्यत
द्भिन्नद्ववेजात्ययोर्द्वयोरेव कर्मादिजन्यतावच्छेदकत्वे सर्वत्रैव द्विविधवेगोत्पत्त्यापत्तेः। ए
४ग कसामग्र्या अपरस्य प्रतिबंधकत्वाभ्युपगमे च महागौरवापत्तेरिति भावः। वेगनाशत्वेन संयो ॥२॥
गत्वेनैव कार्यकारणभावात्। [illegible] नाश्यनाश्य वेगमात्रं प्रति प्रतियोगिता [illegible] कार्यता
वच्छेदकसंबंधतया [illegible] वेगनाशे व्यभिचारश्च। ध्वंसभेदेन प्रतियोगितामे
दस्य सर्वसिद्धत्वात् संबंधाननुगमस्य चादोषत्वात् कारणतावच्छेदकसंबंधस्य फलोपधा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नात्मकवेगनिष्ठस्य प्रयोजकत्वमेव॥ इत्थं वाण्यत्नाशानाश्यकर्मजवेगस्याष्टक्षणावस्था
यित्वं तथाहि। नोदनाख्यप्रथमेषोः कर्म ततो वेगः पूर्वदेशविभागस्ततः पूर्वसंयोगनाशः
ततो वेगवदिषोरुत्तरसंयोगः। ततो वेगजनककर्मणो विनाशः ततो वेगवदिषोर्द्वि
तीयं कर्म तत उत्तरदेशाद्विभागः। तत उत्तरदेशसंयोगविनाशस्ततः पुनरुत्तरदेशा
न्तरसंयोगः। अयमेव च संयोगो वेगप्रयोज्यस्ततो वेगजनकस्य द्वितीयकर्मणो युगपद्वि
विनाशः॥ अथैवं स्वप्रयोज्यस्य संयोगस्य वेगनाशकत्वेपि वेगादिषोरस्तृतीयादिकर्मोत्प
त्त्यसंभवः। द्वितीयादिकर्मनाशसमकालमेव तज्जनकवेगस्य नाशात्तु न द्वितीयादि
कर्मजनकवेगस्य द्वितीयादिकर्मनाशसमकाले नाशेपि द्वितीयादिकर्मणा विभागोत्प
त्तिकाल एव वेगान्तरजननात्तेनैव वेगेनादिकर्मोत्पत्तिः द्वितीयकर्मजन्योत्तरसंयो
गस्य द्वितीयकर्मजवेगाप्रयोज्यत्वात् X नरतीयाक तद्नाशकत्वादिति वाच्यं। एकेनै
व कर्मणा वेगद्वयोत्पादकत्वाय समवायघटितसामानाधिकरण्यप्रत्यासत्त्या वेगां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

3 प्रति वेगस्य प्रतिबंधकत्वावश्यकतया वेगवति वेगांतरोत्पत्तेरसंभवात् इति चेन्न वे
गजवेगं प्रति निरुक्तप्रत्यासत्त्या वेगसामान्यस्य प्रतिबंधकत्वेपि कर्मजवेगं प्रत्यतथात्वा
त्। तत्कर्मजवेगं प्रति तत्कर्मजवेगस्यैव प्रतिबंधकत्वात्। कर्मणो वेगं प्रत्युत्पत्ति संबंधे
न हेतुत्वाभ्युपगमादेवैकेन कर्मणा वेगधारोत्पत्तिवारणसंभवेन कर्मजवेगं प्रति वेगस्य
प्रतिबंधकत्वे मानाभावाच्च। न च एवं तद्रूपेण स्यवेगसामान्यं प्रति निरुक्तप्रत्यासत्त्या वेगसा
मान्यप्रतिबंधकत्वकल्पनेव लघीयसी। वेगजवेगं प्रति वेगसामान्यप्रतिबंधकताया ॥श्री॥
स्तत्वापावश्यकत्वात् इति वाच्यं। इषादे वेगात्तृतीयादिकर्मान्यथानुपपत्त्या फलमु ॥३॥
खगौरवस्याप्युपगमादित्याहुः॥ नैयायिकास्तु एतद्गौरवापत्त्या स्वजन्ययोर्वेगो
नाशकः किंतु स्वजन्यकर्मैव वेगनाशकमप्युरप्पीतित्याहुः। तत्कर्मजवेगस्य हेतु
कतापात्ते वैरूप्याय स्वजन्यत्वं कर्मविशेषणं। न चैवं जन्यत्वमपेक्ष्य ग्राह्ययोर्ज्यत्वस्य
लघुतया वैशिकमतमेव सम्यक् प्रतिबध्यप्रतिबंधकभावद्वयादिकल्पना

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

याः फलसुखत्वादिति वाच्यं जन्यत्वस्यापि प्रयोज्यतया ममापि स्वप्रयोजककर्मण एव नाश
कतायाः सुवचत्वात् तथा च वेगनाशत्वेन कार्यता कर्मत्वेन कारणता। आश्रयनाशस्या
पि वेगव्याहेत्तप्रतियोगिताव्यक्तीनां कार्यतावच्छेदकसंबंधः तथा च नाश्रयनाशजन्य
वेगनाशे व्यभिचारः। यत्र तादृशप्रतियोगितासंबंधेन वेगनाशस्तत्र फलोपधाना
त्मकवेगनिष्ठजनकतासंबंधेन तादृशवेगनिष्ठप्रयोजकतासंबंधेन वा कर्मेति सा
मानाधिकरण्यप्रत्यासत्तिः इत्थं वाद्यकर्मजवेगस्य पंचक्षणावस्थायित्वं द्वितीयादि
कर्मजवेगस्य चतुःक्षणावस्थायित्वं तथाहि नोदनादाद्यनिष्पोः कर्म। ततो वेगः। हर्वदेशा
विभागो ततः पूर्वसंयोगनाशस्ततस्तदुत्तरदेशसंयोगस्ततः कर्मनाशस्ततो वेगात्क
र्मान्तरं ततो वेगस्य पञ्चमक्षणे वेगनाशोत्तरविभागो ततस्तदुत्तरदेशसंयोगनाशस्ततस्तदुत्त
रदेशान्तरसंयोगस्ततो द्वितीयकर्मजवेगात् तृतीयकर्म ततो द्वितीयकर्मजवेगस्य ना

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शब्दत्वादिकमूह्यं॰ न चैवमपि पादेश्चरमकर्मजन्यवेगस्य जन्मतोऽविनाशस्तज्जन्यकर्मविरहाद्
दाश्रयनाशान्तेञ्चाशाम्यपगमे चरमोक्तसंयोगोन्तरमपि आवृत्ताश्रयस्य वेगप्रस
ङ्गापत्तेरिति वाच्यं। कर्मत्वव्याप्यवैजात्यविशेषस्यैव कर्मनिष्ठवेगजनकतावच्छेदके
त्वाच्चरमकर्मणो वेगाजनकत्वात्। अन्यथा तेन वेगेन कर्मान्तरजननापत्तेः। वेगस्य
सामान्यतो वेगत्वेनैव कर्मजनकत्वात्। वैशेषिकनयेऽपि तद्वेगस्याप्याश्रयमव
स्थानापत्तेश्चास्य प्रयोज्यसंयोगस्यैव तज्जन्यवेगनाशकत्वात्। चरमकर्मजन्यचरम
न्तरसंयोगस्य च तदप्रयोज्यत्वात्। न्यायमते चरमकर्मणो वेगाजनकत्वे चरमा
न्तरसंयोगोत्पत्तिक्षणे तत्सर्वोत्तरक्षणे च वेगप्रत्यक्षेण स्यात्। चरमकर्मजनके
वेगस्य चरमकर्मोत्पत्तिद्वितीयक्षणे एव नाशात्। वैशेषिकनये चरमकर्मणो वेगाज
नकत्वेऽपि चरमकर्मजनकवेगस्यैव चरमसंयोगपर्यन्तमवस्थानात् तत्क्षणे वेगप्रत्यक्षो
पपत्तेः।

॥श्री॥ ॥५॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अत एवानुपपन्नादेतेःस्वजन्यकर्मविरहायस्यस्वजन्यकर्मजन्यसंयोगस्यनाशकत्वा
भ्युपगमादितिवाच्यंतथासतिवेगप्रत्यक्षस्यैवाप्रसिद्धेःकेवलंकर्मण्येवगतेर्नांप्रत्यक्ष
त्वमेवंवेगस्यैवासिद्ध्यापत्तिःसर्वत्रैवकेवलकर्मणःप्रत्यक्षस्यैवसुवचत्वादितिवा
अन्यथोत्तरोत्तरकर्मासम्पादनानुपपत्त्यैववेगस्याभ्युपगमात्.ननुप्रत्यक्षत्वकालीने
वेगप्रत्यक्षस्याविवादग्रस्तत्वात्.अन्यथाऽयंकर्मण एव त्रिकालावच्छिन्नत्वमभ्युप
गमःस्थितिस्थलेवेगस्यैवाऽनभ्युपगन्तव्यत्वादितिसमासः॥ वेगनाश्यनाशकभावरहस्यं।
॥ ॥ ननु अपेक्षाबुद्धिर्द्वित्वादिजनिकाननु सादिकेतिमीमांसकाः।तेषांकेनरूपेणतयोर्वि
षयकंत्वकमावच्छिन्नवेदनंकेविन्नातच्चकित्वावच्छिन्नविशेष्यताकापेक्षाबुद्धित्वेनकार्य
कारणभावःकिंसमवेतानेकसंख्याप्रत्यक्षत्वेनकार्यतासमवायघटितसामानाधिकर
ण्यंप्रत्यासत्तिः।अपेक्षाबुद्धित्वंचएकत्वप्रकारकबुद्धित्वान्नचैवंतत्रकित्वमात्रविशेष्यका

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६

पेक्षाबुद्धिमात्रजन्यतायामपि तद्व्यक्तिसमवेतत्वादिप्रत्यक्षापत्तिरिति वाच्यं । तद्व्यक्तिसम
वेतद्वित्वादेर्भ्रान्तेतरसमवेतत्वनियमेन तद्व्यक्तिसमवेतद्वित्वादिप्रत्यक्षसामग्रीवि
रहादेव तदनापत्तेः तद्व्यक्तिसमवेतद्वित्वादेः गमकत्वानुपपत्तेः । न चैवं तथाप्यपेक्षाबुद्धिविरह
दशायां तद्व्यक्तिमात्रविशेष्यकापेक्षाबुद्धिदशायां तद्व्यक्तिसमवेतद्वित्वादेः प्रत्यक्षत्वं मा
स्तु संनिकर्षादिसामान्यसामग्रीमर्यादया तद्व्यक्तिसमवेतद्वित्वादेः ऽन्यसमवेतत्वा
दिविशिष्टलौकिकविषयतासंबंधेन चाक्षुषादिकं स्यात् सामान्यकार्यानुत्पत्तिर्दुर्वारे
वेति वाच्यं । ऽन्यसमवेतत्वाद्युपेक्षिद्विविधं । अनेकसंख्याविषयत्वे तद्भिन्नसंख्यावि
षयकत्वाभावस्याप्यपेक्षाविधाने तद्व्यक्तिसमवेतानेकसंख्याविषयत्वं । तद्व्यक्तिसमवेता
नेकसंख्याविषयकेच्छा तत्रगमनमस्य तदोषेनैतन्नोत्पत्तिसंभवः । उक्तयुक्त्यैव तद
व्यक्तिद्वित्वादिपरस्यापि तद्व्यक्तिनिष्ठत्वेनानेकसंख्याविषयकोक्तिरित्येकस्य तद्व्यक्तिसमवेता
नां ।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नेकसंख्याविषयकप्रत्यक्षस्याधीकृत्वात्। नापि द्वितीयस्यानेकसंख्याभिन्नविषयक
प्रत्यक्षं प्रत्यनेकसंख्यायास्तादात्म्यसंबंधेन प्रतिबंधकत्वाभ्युपगमात् तादृशकृत्स्नेदसतः
पदविशेष्यकापेक्षाबुद्धिविरहेपि घटपटवृत्तिद्वित्वप्रत्यक्षदशायां घटपटवृत्ति
द्वित्वेपि संनिकर्षादिसामान्यसामग्रीमर्यादयाऽव्यसमवेतत्वविशिष्टलौकिकवि
षयतासंबंधेन चाक्षुषादिजन्यसामान्यापत्तेः। घटेन्द्रियसंयुक्तत्वेनानेकसंख्याप्रत्यक्षसा
मग्र्या एव सत्त्वेनोक्तेः। यावद्विशेषसामग्रीविरहदशायां संभवात्। तादृशे तद्द्वित्वद्वित्वप्र
त्यक्षप्रतितन्तुनये तेषांच्छिन्नत्वावच्छिन्नविशेष्यकापेक्षाबुद्धिहेतुरित्यादिकमनेनैवसर्वेन्द्रस
मृहीतंकेवलापेक्षाबुद्ध्येवद्वित्वादिप्रत्यक्षं गतितादात्म्यसंबंधेन तद्वृत्तिद्वित्वादिकमनेकसं
ख्याभिन्नविषयकप्रत्यक्षं प्रत्यनेकसंख्याभेदश्च विषयविषयविधया हेतुरिति नोक्तस्थले
संनिकर्षादिसामान्यसामग्रीमर्यादया निरुक्तलौकिकविषयतासंबंधेन चाक्षुषादिजन्य
सामान्यकार्यापत्तिः। यावद्विशेषसामग्रीबाधादित्याकृत्स्नदसतः अनन्तकार्यकारणभा
व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वप्रसंगता। न्यूनोतु। न्यूनैकसंख्यात्वविशिष्टलौकिकविषयतासंबंधेन तत्पुरुषीयप्रत्यक्षो
त्पत्तिं प्रतिनिर्विकल्पकत्वेव्याप्तित्वावच्छिन्नप्रतियोगिताकतत्पुरुषीयापेक्षाबुद्धिप्रतियोगिक
विकल्पकाभावव्यक्तेः स्वाश्रयसमवेतत्वसंबंधेन प्रतिबंधकत्वमेवापेक्षाबुद्ध्यादेर्द्वित्वादि
खंडकत्वं न तु नश्यत्ताबुद्धेर्द्वित्वादिप्रत्यक्षजनकत्वं तत्र खंडकत्वं प्रतियोगितावच्छेदक
संबंधानामननुगतत्वेपि तावत्संबंधघटितप्रत्येकपर्याप्तप्रतियोगितावच्छेदकताक
रकत्वेनाभावभेदाभावात्। प्रतियोगितावच्छेदकताभेदेनैवाभावभेदात्। अत एव का
रणतावच्छेदकसंबंधादेरननुगमोपि न दोषायेति प्राचीनैरप्युपगीयते। तावत्संबंधघटित
प्रत्येकपर्याप्तप्रतियोगितावच्छेदकताकविकल्पकाभावस्तु व्यक्तेः कारणतावच्छेदकतया वा
ऽन्यथा प्रत्येकैकतत्संबंधावच्छिन्नाभावं तावत्संबंधकूटावच्छिन्नाभावं वादाय व्यभिचा
रविरहात्। तादृशाभावस्य तु तावत्संबंधकूटस्य तत्र भव्यक्तिसंबंधेन प्रतियोगित्वमेव विरो
धेनादृशविकल्पाभावानभ्युपगमे स्वरूपसंबंधेन कारणत्वादिस्वीकारे प्रा× स× वीनतथ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तस्यानुगतत्वेन तेन संबंधेन कारणत्वस्यैव दुर्वचत्वादित्यत्र विस्तरः। स्यात्तु वा स्वरूपतो
ऽवच्छिन्नयावृत्तिःऽवृत्तिधर्मावच्छिन्नविशेष्यताकत्वेन सत्ता घटे लौकिकत्वावच्छिन्नविशेष्यत्वानाम
नुगमश्च न वर्तते हि तत्तद्व्यक्तित्वं व्यक्तिविषयत्वे स्वरूपवृत्तितत्तद्व्यक्तिमात्रवृत्त्यधिकरण
ताविशेष्यतादिरूपाणां नाम स्वं गतिरिक्तधर्मरूपाणां तत्तदेतद्रूपत्वात्। तासां स्वरू
पत एवापेक्षाबुद्धेः विशेष्यतावच्छेदिकाऽऽत्मरूपं स्वरूपाधिकरणतत्पदार्थस्यैव किंचिद्धर्म
रूपेणानुगमकारकत्वनियमात् तत्तद्व्यक्तिमात्रवृत्ति स्वरूपरसादिव्यक्तिः संबंधेन रूप
त्वरसत्वादिरेव तत्तद्वदन्तेति वाच्यं लाघवादन्तेनैव रूपत्वेति बंधकत्वकल्पनेः तस्य
तत्तदेतद्रूपत्वसंभवेऽपि सर्वत्र तत्तदधिकरणताविशेष्यतादिव्यक्तित्वावच्छिन्नविशेष्यता
कापेक्षाबुद्धावेवच्छिन्नत्वादिमत्वस्याप्युपगमात्तान्वयसामान्यतो विशेष्यतासंबंधावच्छिन्न
प्रतियोगिताकाभावः एवं प्रतिबंधकोऽस्तु किमवच्छिन्नो तेन विशेष्यताविशेषणेति ग
कांनिरुक्तिताघटकत्वमेवापेक्षाबुद्धावपिछिन्नत्वादिप्रसक्तापत्तेः भावाभावसाधारण

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वाग्त्वष्णकृरितिसमासः ।। अपेन्द्राकुक्षिद्विलयोर्नोश्पनाशकृत्वथा। ७ ।। श्री ।। ११

स्त्रसोर्किंवु ।। गध स्त्रुणोरि ० श्याम [illegible] रघ्रदर ३३

धवका क ॐ घा का श्री प्रस्यंगोस्तुरसक्षवृर्णलुदितं दुग्धाढकेपा विजातीप

-प्रलेसीयार्के ऽका र त्रलवंगलोहम विंवंकर्पूरमाकल्कं शुल्वंशाधितपादंदच

शुंठीबाल मितान्कलालं नमिताधीप्या यवनारजनीधात्रीकं ताकेशरंजानुर्नीत मथ्याहि के [illegible] शठी शुंठीकुबे

रुमाद्रागानानित्यद्वयंवल्वव ला [illegible] राधमकं (१) लुल्यंशकं रयातदर्ध विजयाप्स्यार्धकं [illegible] पुत्रा

वैतन्नमा कोष्टा टेवरु गामरल [illegible] वैघवरे लाविभितमि दमदाग्निना पावित प्रातःसेवितमौबधंब

ल्लोलि वरागो दितष्वूर्लींद्रीनविभस्मलात्म स्तुनिजे र्यधि स्वचिर्ष्वसतं वर्णो [illegible] सर्वमेहशमनं प्रौ [illegible] गनाद्रावकं

कुरुतेकिं भोजनंभोमना:। अमिनद्य गाद्रु रयाकीव धर्मीवनात

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative